# .. Bhavani-Bhujangaprayata Stotra..

## ॥ भवानीभुजङ्गप्रयातस्तोत्रम् ॥

श्री गणेशाय नमः ।

षडाधारपङ्केरुहान्तर्विराजत्
सुषुम्नान्तरालेऽतितेजोल्लसन्तीम् ।
सुधामण्डलं द्रावयन्ती पिबन्तीं
सुधामूर्तिमीडेऽहमानन्दरूपाम् ॥ १॥

ज्वलत्कोटिबालार्कभासारुणाङ्गीं
सुलावण्यशृङ्गारशोभाभिरामाम् ।
महापद्मकिञ्जल्कमध्ये विराजत्
त्रिकोणोल्लसन्तीं भजे श्रीभवानीम् ॥२॥

कणत्किङ्किणीनूपुरोद्भासिरत्न
प्रभालीढलाक्षार्द्रपादारविन्दाम् ।
अजेशाच्युताद्यैः सुरैः सेव्यमानां
महादेवि मन्मूर्ध्नि तेक्षावयामि ॥ ३॥

सुषोणाम्बराबद्धनीवीविराजन्
महारत्नकाञ्चीकलापं नितम्बम् ।
स्फुरद्दक्षिणावर्तनाभिं च तिस्रो
वली रम्यते रोमराजीं भजेऽहम् ॥ ४॥

लसद्वृत्तमुत्तुङ्गमाणिक्यकुम्भो-
पमश्रीस्तनद्वन्द्वमम्बांबुजाक्षीम् ।
भजे पूर्णदुग्धाभिरामं तवेदं
महाहारदीप्तं सदा प्रस्नुतास्यम् ॥ ५॥

शिरीषप्रसूनोल्लसद्बाहुदण्डैर्-
ज्वलद्बाणकोदण्डपाशाङ्कुशैश्च ।
चलत्कङ्कणोदारकेयूरभूषा
ज्वलद्भिः स्फुरन्तीं भजे श्रीभवानीम् ॥ ६॥

शरत्पूर्णचन्द्रप्रभापूर्णबिम्बा
धरस्मेरवक्त्रारविन्दश्रियं ते ।
सुरत्नावलीहारताटङ्कशोभा
भजे सुप्रसन्नामहं श्रीभवानीम् ॥ ७॥

सुनासापुटं पद्मपत्रायताक्षं
यजन्तः श्रियं दानदक्षं कटाक्षम् ।
ललाटोल्लसद्गन्धकस्तूरिभूषो-

ज्ज्वलद्भिः स्फुरन्तीं भजे श्रीभवानीम् ॥ ८॥
चलत्कुण्डलां ते भ्रमद्भृङ्गवृन्दां
घनस्निग्धधम्मिल्लभूषोज्ज्वलन्तीम् ।
स्फुरन्मौलिमाणिक्यमध्येन्दुरेखा
विलासोल्लसद्दिव्यमूर्धानमीडे ॥ ९॥
स्फुरत्वम्ब बिम्बस्य मे हृत्सरोजे
सदा वाङ्मयं सर्वतेजोमयं च ।
इति श्रीभवानीस्वरूपं तदेवं
प्रपञ्चात्परं चातिसूक्ष्मं प्रसन्नम् ॥ १०॥
गणेषाणिमाद्याखिलैः शक्तिवृन्दैः
स्फुरच्छ्रीमहाचक्र राजोल्लसन्तीम् ।
परां राजराजेश्वरीं त्वा भवानीं ( त्रैपुरि त्वां)
शिवाङ्कोपरिस्थाँ शिवाँ भावयेऽहम् ॥ ११॥
त्वमर्कस्त्वमग्निस्त्वमिन्दुस्त्वमाप-
स्त्वमाकाशभूवायवस्त्वं चिदात्मा ।
त्वदन्यो न कश्चित्प्रकाशोऽस्ति सर्वं
सदानन्दसंवित्स्वरूपं तवेदम् ॥ १२॥
गुरुस्त्वं शिवस्त्वं च शक्तिस्त्वमेव
त्वमेवासि माता पिताऽसि त्वमेव ।
त्वमेवासि विद्या त्वमेवासि बुद्धिर्-
गतिर्मे मतिर्देवि सर्वं त्वमेव ॥ १३॥
श्रुतीनामगम्यं सुवेदागमाद्यैर्-
महिम्नो न जानाति पारं तवेदम् ।
स्तुतिं कर्तुमिच्छामि ते त्वं भवानि
क्षमस्वेदमम्ब प्रमुग्धः किलाहम् ॥ १४॥
शरण्ये वरेण्ये सुकारुण्यपूर्णे
हिरण्योदराद्यैरगम्येऽतिपुण्ये ।
भवारण्यभीतं च मां पाहि भद्रे
नमस्ते नमस्ते नमस्ते भवानि ॥ १५॥
इमामन्वहं श्रीभवानीभुजङ्ग-
स्तुतिर्यः पठेच्छ्रोतुमिच्छेत तस्मै ।
स्वकीयं पदं शाश्वतं चैव सारं
श्रियं चाष्टसिद्धीश्च भवानी ददाति ॥ १६॥
(
भवानी भवानी भवानी त्रिवारम्-
उदारम् मुदा सर्वदा ये जपन्ति ।

न शोकम् न मोहम् न पापं न भीतिः
कदाचित्कथंचित्कुतश्चज्जनानाम् ॥ १७)
इति श्रीमच्छङ्कराचार्यविरचितं
भवानीभुजङ्गप्रयातस्तोत्रं संपूर्णम् ॥

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010
http://sanskritdocuments.org